झारखण्ड शैक्षिक अनुसंधान एवं प्रशिक्षण परिषद् राँची, झारखण्ड

वार्षिक परीक्षा 2022-23

मॉडल प्रश्न पत्र (वस्तुनिष्ठ)

कक्षा - द्वादश / विषय - संस्कृत / समय- 1.30 घंटा / पूर्णांक- 40

सामान्य-निर्देशाः :-

- अस्मिन् प्रश्नपत्रे 40 वस्तुनिष्ठप्रश्ना: सन्ति।
- सर्वे प्रश्ना: समानाङ्का:।
- सर्वे प्रश्ना: अनिवार्या:।
- प्रदत्तेषु विकल्पेषु उचितम् उत्तरं चिनुत।

*****************************

**निर्देश :- अधोलिखितं अपठितगद्यांशं पठित्वा प्रदत्तान् प्रश्नान् विकल्पेभ्य: उत्तरं चिनुत-**

**सर्वेषु धनेषु विद्याधनम् एव उत्तमं धनं मन्यते ।विद्यया एव जनाः जानन्ति यत् किं कर्तव्यम् अस्ति किं च अकर्तव्यम्। अनया एव ज्ञायते यत् किम् उचितम् अस्ति किं च अनुचितम्। विद्याधनेन एव वयं जानीमः यत् कः सन्मार्गः अस्ति क: च कुमार्ग :।विद्यया एव मनुष्यः संसारे सम्मानं प्राप्नोति। विद्याहीनः जनः पशुतुल्यः एव भवति। कर्तव्याकर्तव्ययो:, धर्माधर्मयो:, हानिलाभयो: उचितानुचितयोश्च मध्ये सः अन्तरं न जानाति। विद्यया एव मानवजीवनमूल्यं ज्ञायते, जनानां सुखदुःखयोः भागं विद्यया एव गृह्यते ।विद्याहीनस्य जनस्य जीवने कदापि सुखं, सोहार्द्रं, प्रसन्नता सहभागिताः च न भवन्ति। अतः' विद्या विहीनः पशुः' इति कथयित्वा विद्यायाः गुणगानं शास्त्रै:कृतम्। विद्याधनाय वारं वारं नमः।**

**1.किं धनम् उत्तमं मन्यते ?**

(क) विद्याधनम्

(ख) पशुधनम्

(ग) सर्वधनम्

(घ) साधुधनम्

2.कया मनुष्य: सम्मानं प्राप्नोति ?

(क) विद्यया

(ख) अनया

(ग) कन्या

Jharworld.com

(घ) लतया

3.'वयम्' इति कर्तृपदस्य क्रियापदं किम् ?

(क)जानान्ति

(ख) जानीम:

(ग) जानाम:

(घ) ज्ञास्याम:

4.गद्यांशे अव्ययपदं किम् ?

(क) जानीम:

(ख) एव

(ग)अस्ति

(घ) क:

**निर्देश :- अधोलिखितं पद्यम् पठित्वा प्रदत्तान् प्रश्नान् विकल्पेभ्य: उत्तरं चिनुत-**

**तमध्वरे विश्वजिति क्षितीशं**
**नि:शेषविश्राणितकोषजातम् ।**
**उपात्तविद्यो गुरुदक्षिणार्थी**
**कौत्स: प्रपेदे वरतन्तुशिष्य:।।**

5.विश्वजित् यज्ञं क: अकरोत् ?

(क) कुबेर:

(ख) इन्द्र:

(ग) वरुण:

(घ) रघु:

6.कौत्स: कस्य शिष्य: आसीत् ?

(क)विश्वामित्रस्य

(ख)द्रोणाचार्यस्य

(ग)वरतन्तो:

Jharworld.com

(घ) परशुरामस्य

7.रघु: कम् अध्वरम् अनुतिष्ठति स्म ?

(क) अश्वमेध:
(ख) विश्वजित्
(ग) पुत्रेष्टि:
(घ) न कोऽपि

8.'दक्षिणार्थी' अस्य सन्धिविच्छेदं चिनुत-

(क) द+क्षिणार्थी
(ख) दक्षि+ णार्थी
(ग) दक्षिणा + अर्थी
(घ) दक्षिणा+ थी

**निर्देश :- अधोलिखितं गद्यांशम् पठित्वा प्रदत्तान् प्रश्नान् विकल्पेभ्य: उत्तरं चिनुत-**

**दीनबन्धु: श्रीनायार: प्रतिमासं प्रथमदिवसे स्ववेतनस्य अर्धाधिकं भागं केरलं प्रेषयति स्म कश्चित् सम्पर्क:।कानिचिन् मलयालमभाषाया: संवादपत्राणि अतिरिच्य कदापि तस्य नाम्ना किमपि पत्रमागतमिति कोऽपि कदापि न जानाति।**

9.दीनबन्धु: श्रीनायार: स्ववेतनस्य अर्धाधिकं भागं कुत्र प्रेषयति स्म ?

a. उड़ीसाप्रदेशे
b. मध्यप्रदेशे
c. उत्तरप्रदेशे
d. केरलप्रदेशे

10.पत्रस्य भाषा का आसीत् ?

(क) तमिलभाषा
(ख) मलयालमभाषा
(ग) कन्नड़भाषा
(घ) तेलगुभाषा

11.'प्रति'योगे का विभक्ति: भवति ?

(क) द्वितीया

Jharworld.com

(ख) तृतीया

(ग) चतुर्थी

(घ) पंचमी

12.'रात्रौ' अस्य विलोमपदम् अत्र किं प्रयुक्तम्?

(क) दिवसे

(ख) मासं

(ग) वेतनं

(घ) अतिरिच्य

**निर्देश :- अधोलिखितं पद्यम् पठित्वा प्रदत्तान् प्रश्नान् विकल्पेभ्य: उत्तरं चिनुत-**

**कर्मण्येवाधिकारस्ते मा फलेषु कदाचन।**

**मा कर्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि।।**

13.गीतायां श्रीकृष्ण: कस्मै उपदेशं यच्छति ?

(क) युधिष्ठिराय

(ख) भीमाय

(ग) अर्जुनाय

(घ) नकुलाय

14. कर्मण्येवाधिकारस्ते मा ..........कदाचन।

उचितं पदं चित्वा रिक्तस्थानं पूरयत।

(क) पुष्पेषु

(ख) फलेषु

(ग) पत्रेषु

(घ) वृक्षेषु

15. उपर्युक्तश्लोक: केन कथित: ?

(क) अर्जुनेन

(ख) भीमेन

(ग) कृष्णेन

(घ) नकुलेन

16. **फलेषु** पदे का विभक्ति: प्रयुक्ता ?

(क) पंचमी

Jharworld.com

(ख) षष्ठी

(ग) सप्तमी

(घ) तृतीया

**निर्देश :- प्रदत्तेषु विकल्पेषु उचितम् उत्तरं चिनुत।**

17.अम्बिकादत्तव्यासस्य रचनां चिनुत -

(क) मेघदूतम्

(ख) शिशुपालवधम्

(ङ) उत्तररामचरितम्

(ग) शिवराजविजयम्

18.'सिंहासनद्वात्रिंशिका' इति ग्रंथात् क: पाठ: संकलित:

(क) विक्रमस्यौदार्यम्

(ख) बालकौतुकम्

(ग) किन्तो: कुटिलता

(घ) सूक्ति-सुधा

19. संस्कृतभाषाया: सर्वाधिकप्रतिभाशाली गद्यकार: क: ?

(क) बाणभट्ट:

(ख) कालिदास:

(ग) अम्बिकादत्तव्यास:

(घ) चन्द्रशेखरदासवर्मा

20. 'स्मृत:' शब्दस्य विपरीतार्थकपदं चिनुत-

(क) अस्मृत:

(ख) विस्मृत:

(ग) अमृत:

(घ) मृत:

21. 'सर्वाण्येव' अस्य सन्धिविच्छेदं चिनुत -

(क) सर्वाणि+एव

(ख) सर्वा+ण्येव

Jharworld.com

(ग) सर्वाण+एव

(घ) सर्वाण्ये+ व

22. स+उत्साहम्= ?

(क) सुत्साहम्

(ख) सात्साहम्

(ग) सोत्साहम्

(घ) स्वात्साहम्

23. पुन: + अत्र = ?

(क) पुनत्र

(ख) पुनरत्र

(ग) पुनोरत्र

(घ) पुन:अत्र

24. 'कोऽपि' अस्य सन्धिविच्छेदं किम् ?

(क) को+ अपि

(ख) का + अपि

(ग) क:+ अपि

(घ) को +ऽपि

25. 'दातव्यम् ' इत्यस्य प्रकृतिप्रत्ययविभाग: कुरुत -

(क) दा+ तव्यत्

(ख) दा+ क्त्वा

(ग) दा+ तुमुन्

(घ) दा+ क्त

26. दृश्+ अनीयर् =?

(क) दर्शनीयम्

(ख) दृशनीय

(ग) दृशनीयर्

(घ) दृशानीयर्

27. महत्+त्व = ?

(क) महत्त

(ख) महत्त्व

(ग) महत्ता

(घ) महान्

28. गुरुता ' पदे क: प्रत्यय: प्रयुक्त: ?

(क) तल्

(ख) त्व

Jharworld.com

(ग) क्त्वा

(घ) क्त

29. 'व्याघ्रभयम्' अस्य सामासिकविग्रहं कुरुत-

(क) व्याघ्रस्य भयम्

(ख) व्याघ्रेण भयम्

(ग) व्याघ्रात् भयम्

(घ) व्याघ्रे भयम्

30. "अह: च निशा च " अस्य समस्तपदं चिनुत-

(क) अहर्निशम्

(ख) अहा निशम्

(ग) अह: निशा

(घ) निशा अह:

31. "दिक् अम्बरम् यस्य स:"अस्य समस्तपदं चिनुत-

(क) दिगाम्बरान्

(ख) दिगम्बर:

(ग) दिगम्बरस्य

(घ) दिगम्बराणाम्

32. 'पितरौ' अस्य सामासिकविग्रहं चिनुत-

(क) पिता पिता

(ख) माता माता

(ग) माता च पिता च

(घ) मातरौ च पितरौ च

33. <u>कर्मणाम्</u> अनारम्भात् पुरुष: नैष्कर्म्यं न अश्नुते।अत्र रेखाङ्कितपदे का विभक्ति:?

(क) षष्ठी

(ख) सप्तमी

(ग) पंचमी

(घ) चतुर्थी

34. 'नम: ' योगे का विभक्ति: भवति ?

(क) तृतीया

(ख) चतुर्थी

(ग) पंचमी

(घ) षष्ठी

35. धिक् <u>विद्याहीनम् ।</u> अत्र रेखाङ्कितपदे का विभक्ति:?

(क) द्वितीया

Jharworld.com

(ख) तृतीया

(ग) चतुर्थी

(घ) पंचमी

36. मम माता <u>मयि</u> स्निह्यति ।अत्र स्निह् योगे का विभक्ति:?

(क) चतुर्थी

(ख) पंचमी

(ग) षष्ठी

(घ) सप्तमी

37. कति वेदा:?

(क) त्रय:

(ख) चत्वार:

(ग) पंच

(घ) षड्

38. "बाणोच्छिष्टं जगत्सर्वम् " इति उक्ति: कस्य विषये प्रसिद्धा ?

(क) कालिदासस्य

(ख) माघस्य

(ग) बाणभट्टस्य

(घ) भारवे:

39. गद्यपद्यमिश्रितं काव्यं कथ्यते -

(क) चम्पूकाव्यम्

(ख) नाटकम्

(ग) प्रकरणम्

(घ) पद्यम्

40. य: नाटकस्य सूत्रं धारयति, स: क: भवति?

(क) विषकम्भक:

(ख) नायक:

(ग) जवनिका

(घ) सूत्रधार:

****************************

Jharworld.com

झारखण्ड शैक्षिक अनुसंधान एवं प्रशिक्षण परिषद् राँची, झारखण्ड

वार्षिक परीक्षा 2022-23

मॉडल प्रश्न पत्र (विषयनिष्ठ)

झारखण्ड शैक्षिक अनुसंधान एवं प्रशिक्षण परिषद् राँची, झारखण्ड

कक्षा - द्वादश / विषय - संस्कृत /

समय- 1.30 घंटा / पूर्णांक- 40

---

सामान्य-निर्देशाः :-

1. सर्वेषां प्रश्नानाम् उत्तराणि संस्कृते एव कर्त्तव्याणि-

2. सर्वेषां प्रश्नानाम् संख्या 19 अस्ति ।

3. प्रश्न-संख्या 1 तः 7 पर्यन्तम् अति- लघूत्तरीयाः प्रश्नाः सन्ति। अस्य कृते 2-2 अंकौ निर्धारितौ स्त:। केचन पंच प्रश्नान् उत्तरत।

4. प्रश्न-संख्या 8तः 14 पर्यन्तम् लघूत्तरीया: प्रश्ना: सन्ति।।अस्य कृते 3-3 अंका: निर्धारिता: ।केचन पंचैव प्रश्ना: समाधेया:।

5. प्रश्न-संख्या 15तः 19 पर्यन्तं दीर्घूत्तरीयाः प्रश्नाः सन्ति । अस्य कृते 5-5 अंकाः निर्धारिताः ।केचन त्रयैव प्रश्नान् उत्तरत।

---

Jharworld.com

खण्ड -क

**अपठितावबोधनम्**

**निर्देश: - अस्मिन् खण्डे सर्वे प्रश्ना: समानाङ्का:।केचन् पंचैव प्रश्ना: समाधेया:। 2*5=10**

अधोलिखितम् अनुच्छेदं पठित्वा प्रदत्तान् प्रश्नान् निर्देशानुसारम् उत्तरत -

भारतदेश: आप्राचीनकालादपि विद्याप्रधान:। विद्याप्रदातार: गुरव: पूज्यतमा:। "गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुर्देवो महेश्वर:। गुरु: साक्षात् परं ब्रह्म, तस्मै श्री गुरवे नमः" इत्येव अस्माकं मूलमंत्र:। गुरुणा विना कापि विद्या पूर्णतां न प्राप्नोति। य: गुरुम् आद्रियते ,शुश्रूषते, गुरूपदेशान् आचरति, तस्मै विद्या स्वयं स्पृहयति, गुरु: अपि तादृशं शिष्यं वात्सल्येन पश्यति, सर्वा: विद्या: शिक्षयति च।

**प्रश्ना:**

1. **पूर्णवाक्येन उत्तरत-** **2**
   (क)क: खलु साक्षात् परं ब्रह्म?
   (ख) गुरु: कीदृशं शिष्यं वात्सल्येन पश्यति?
2. **यथानिर्देशम् उत्तरत-** **2**
   (क)'प्राप्नोति' इति क्रियापदस्य कर्तृपदं किम् ?
   (ख) 'विद्याप्रदातार: ' इति विशेषणस्य विशेष्यं किम्?
   (ग)'आधुनिककालात्' इति पदस्य किं विलोमपदम् अत्र प्रयुक्तम्?
   (घ)'सेवां करोति' इति अर्थे किं पर्यायपदम् अत्र प्रयुक्तम्?

**पठितावबोधनम्**

**अधोलिखितम् गद्यांशं, पद्यं नाट्यांशं च पठित्वा प्रदत्तान् प्रश्नान् निर्देशानुसारं संस्कृतेन उत्तरत-**

**गद्यांश:**

तस्मै राज्ञे व्ययार्थं रत्नचतुष्टयं दास्यामि। द्वितीयरत्नेन भोजनादिकम् अमृततुल्यम् उत्पद्यते। एतेषां महात्म्यम् - एकं रत्नं यद्वस्तु स्मर्यते तद्ददाति। । तृतीयरत्नात् चतुरङ्गबलं भवति । चतुर्थाद् रत्नानिदिव्याभरणानि जायन्ते। तदेतानि रत्नानि गृहीत्वा राज्ञो हस्ते प्रयच्छेति।

Jharworld.com

3. **पूर्णवाक्येन उत्तरत-** 2

(क)द्वितीयरत्नेन किम् उत्पद्यते?

(ख) चतुर्थाद् कानि जायन्ते ?

4. **यथानिर्देशम् उत्तरत-** 2

(क)'ददाति' अस्य कर्तृपदं किम्?

(ख) 'राज्ञे' अस्य मूलशब्दं लिखत।

(ग)'विषम्' अस्य विलोमपदम् अत्र किम्?

(घ)'एतेषां महात्म्यम्' अत्र 'एतेषाम्' इतिपदं केभ्य: प्रयुक्तम्?

**पद्यम्**

सहसा विदधीत न क्रियामविवेक: परमापदां पदम् ।

वृणुते हि विमृश्यकारिणं,गुणलुब्धा: स्वयमेव सम्पद: ।।

**5. पूर्णवाक्येन उत्तरत- 2**

(क)सहसा किं न विद्धीत ?

(ख) अविवेक: कासां पदं वर्तते ?

**नाट्यांश:-**

**बटव:-** पश्यतु कुमारस्तावदाश्चर्यम् ।

**लव: -** दृष्टमवगतं च । नूनमाश्वमेधिकोऽयमश्व:।

**बटव: -** कथं ज्ञायते ?

**लव: -** ननु मूर्खा: । पठितमेव हि युष्माभिरपि तत्काण्डम् ।किं न पश्यथ ? प्रत्येकं शतसंख्या: कवचिनो दण्डिनो निषङ्गिणश्च रक्षितार:। यदि च विप्रत्ययस्तत्पृच्छत ।

6. **पूर्णवाक्येन उत्तरत-** 2

(क)कीदृश: अश्व: तत्र आसीत् ?

(ख) अश्वस्य रक्षार्थं कति रक्षितार: आसन् ?

**7. यथानिर्देशम् उत्तरत- 2**

(क)'पश्यथ' इति क्रियापदस्य कर्तृपदं किम् ?

(ख) 'प्रत्यय:' इति पदस्य किं विलोमपदम् अत्र प्रयुक्तम् ?

Jharworld.com

(ग)' निषङ्गिण:' अस्य विशेष्यपदम् अत्र किम् ?

(घ)'पश्यथ' इति पदस्य मूलधातु: लिखत।

**खण्ड** -ख

**निर्देश: -खण्डेऽस्मिन् सर्वे प्रश्ना: समानाङ्का:। केचन् पंचैव प्रश्ना: समाधेया:।**
**3*5=15**

**8. अधोलिखितश्लोकस्य अन्वयं पूर्णं कुरुत- 3**

**ईशावास्यमिदं सर्वं यत्किंच जगत्यां जगत् ।**
**तेन त्यक्तेन भुञ्जीथा मा कस्यस्विद् धनम् ।।**

**अन्वय:**

जगत्यां यत् किम् च ............इदं सर्वम्................ तेन त्यक्तेन भुञ्जीथा:, कस्यस्विद् धनं मा ..............।

9. रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत- 3

(क)योग: <u>कर्मसु</u> कौशलम् ।

(ख) पृथिव्या: <u>सप्त</u> भेदा:।

(ग)<u>कर्मणि</u> एव अधिकार: ते।

10.श्लोकांशमेलनं कुरुत- 3

| अ | ब |
|---|---|
| ददातिप्रतिगृहणाति | अन्धेन तमसाऽऽवृत्ता: |
| असूर्या नाम ते लोका | मा फलेषु कदाचन। |
| कर्मण्येवाधिकारस्ते | गुह्यमाख्याति पृच्छति। |

11.कोष्ठकेषु प्रदत्तपदेषु उचितं विभक्तिं प्रयुज्य रिक्तस्थानानि पूरयत - 3

(क)सीता ---------- सह वनं गच्छति।(राम)

(ख) ------------- अभित: वृक्षा: सन्ति।(ग्राम)

(ग)--------------- बहि: मन्दिरं शोभते।(नगर)

12.वाक्यनिर्माणं कुरुत - 3

Jharworld.com

(क)विद्यालय:

(ख) वयम्

(ग)सरोवरम्

13.अशुद्धिशोधनं कुरुत - 3

(क)चत्वारि बालिका: पठन्ति।

(ख) यूयम् किं कुर्वन्ति ।

(ग)छात्रौ पुस्तकम् पठति।

14.सन्धिविच्छेदं कुरुत - 3

(क)स्वागतम्

(ख) यशोदा

(ग)जगन्नाथ:

**खण्ड -ग**

**निर्देश: - खण्डेऽस्मिन् पञ्च प्रश्ना: प्रदत्ता: । केचन त्रयैव उत्तरत। 5*3=15**

**15.चित्रं दृष्ट्वा मञ्जूषासहायतया पंच वाक्यानि लिखत- 5**

**मञ्जूषा-**



Jharworld.com

| **तृणानि, वृक्षः, आकाशे, उदेति, सूर्यः, खगाः, हरितः, गृहाणि, पर्वताः, क्षेत्रम्** |
|---|

16.विद्यालयशुल्कक्षमापनार्थं स्वप्राचार्यं प्रति एकम् आवेदनपत्रं लिखत। 5

17.मञ्जूषातः उचितसङ्केतान् गृहीत्वा अधोलिखितां कथां पूरयित्वा पुनः लिखत।
5

स्वामिनो रामकृष्णपरमहंसस्य .......1..... एको योगी तं प्रति ईर्ष्यालुः अभवत्। एकदा सः स्वामिनम् अधः कर्तुम् तत्पार्श्वे गत्वा .......2...... किमस्ति कोऽपि चमत्कारो भवत्पार्श्वे ? रामकृष्णः अवदत्- "अहं तु ......3....... प्राणी।" योगी कथितवान्- "भवान् जलोपरि .......4........ शक्नोति किम्? जले चलन् मारुतिः अपि .......5.......अलङ्घयत्।अतः भवान् ......6.......जलोपरि चल।" रामकृष्णः प्रत्यवदत्- " नाहम् एतत् कर्तुं क्षमः।परमेश्वरः एतद् नादिशति तत्कथं .......7..... इमं श्रमं करिष्यामि।" योगी उच्चस्वरेण प्रत्यब्रवीत्- " अष्टादशवर्षाणि तपः तप्त्वा चमत्कारमिमं लब्धवान् अहम्।" योगिनः .......8...... श्रुत्वा स्वामी प्रत्युत्तरत्, "भवान् अष्टादशवर्षाणि जीवनं वृथा अकरोत्, अहं तु नाविकेन .......9.......गंगायाः पारं गच्छामि।किं भवतः अष्टादशवर्षाणाम् उपार्जनं नाविकस्य पणद्वयान् अधिकम् अस्ति?" स्वामिनो वचांसि श्रुत्वा योगी .......10....... सञ्जातः।

| चलितुम्, समुद्रम्, अब्रवीत्,पणद्वयेन,निरुत्तरः,परिवर्तितुम्,गर्वोक्तिम्,गङ्गायाः, सामान्यः,ख्यात्या । |
|---|

18.नाट्यसाहित्यस्य वैशिष्ट्यं प्रतिपादयत। 5

19. अधोलिखितरचनानां लेखकानां नामानि लिखत।(केवलं पंचानाम्) 5

(क) रघुवंशम्

(ख) पाषाणीकन्या

(ग) समुद्रसंगमः

(घ) शिशुपालवधम्

(ङ) उत्तररामचरितम्

Jharworld.com

****************************************************

Jharworld.com